1037 राम रक्षा पत्र-3

6.50" X 4.50"

॥गोपालायनमः॥चरितंरघुनाथस्य
शतकोटिप्रविस्तरं एकैकमक्षरंपुं
सां महापातकनाशनं १ श्रीरामचं
द्र रणकर्कशरामराम श्रीरामराम
भरताग्रजरामराम श्रीरामराम रघु
नंदनरामराम श्रीरामराम शरणंभव
रामराम १ ॐ अस्य श्रीरामकवचस्य
विश्वामित्रऋषिरनुष्टुप्छंदः श्रीराम
परमात्मादेवता श्रीरामप्रीत्यर्थे जपेवि
नियोगः ॐ ध्यात्वा नीलोत्पलश्यामं
रामं राजीवलोचनं जानकीलक्ष्मणो
पेतं जटामुकुटमंडितं २ सासितूणी
धनुर्बाणं पाणिंनक्तंचरांतकं स्वली
लयाजगत्त्रातुमाविर्भूतमजंविभुं ३
हंलमिच्छलियम्भेव नद्धयंसर्वमयत्नत

रांमरक्षांपठेत्प्राज्ञः पापघ्नींसर्वकामदां
५ शिरोमेराघवःपातु भालंदशर
थात्मजः कौशलेयोदृशौपातु विश्वा
मित्रप्रियःश्रुती ६ घ्राणंपातुमख
त्राताम्मुखंसौमित्रिवत्सलः जिह्वांवि
द्यानिधिःपातुकंठंभरतवंदितः ७
स्कंधौदिव्यायुधःपातुभुजौभग्नेशका
र्मुकः करौसीतापतिःपातु हृदयंजा
मदग्निजित् ८ मध्यंपातुखरध्वंसी
नाभिंजांबुवदाश्रयः सुग्रीवेशःक
टिंपातु सक्थिनीहनूमत्प्रभुः ९
अपानमेढ्रयोपातु रक्षःकुलविना
शनं जानुनीसेतुकृत्पातु जंघेद
शमुखांतकः १० ऊरोजानुशिरःपातु
नक्षानांभयंकरः पादौबिभीषण

रामरक्षा 3

श्रीदः पातुरामोऽखिलंवपुः ११ एतांरां
मवलोपेतं रक्षांयः सुकृतिपठेत् सचि
रायुः सुषीपुत्री विजयीविनयीभवेत्
१२ पातालभूतलव्योम चारिणः छ
द्मकारिणः नद्रष्टुमपिशक्तास्तेरक्षि
तंरामनामभिः १३ रामेतिरामभद्रे
ति रामचंद्रेतिवास्मरेत् नरोनलि
प्यतेपापै भुक्तिंमुक्तिंचविंदति १४ ज
गज्जैत्रैकमंत्रेण रामनाम्नेवरक्षितं
यःकंठेधारयेतस्य करस्थाःसर्वसिद्ध
यः १५ वज्रपंजरनामेदं योरामकव
चंपठेत् अव्याहताज्ञः सर्वत्रलभते
जयमंगलं १६ आदिष्टवान्यथास्व
प्ने रामरक्षामिमांहरिः तथालिखित
वान्प्रातः प्रबुद्धोबुधकौशिकः १७

तरुणौ रूपसंपन्नौ सुकुमारौ महाब
लौ पुंडरीकविशालाक्षौ चीरकृष्णा
जिनांबरौ १८ फलमूलाशिनौ दां
तौ तापसौ ब्रह्मचारिणौ पुत्रौ दश
रथस्यैतौ भ्रातरौ रामलक्ष्मणौ १९
रामाभिरामं नयनाभिरामं वचना
भिरामं वदनाभिरामं सर्वाभिरामं
चसदाभिरामं वंदे सदा दाशरथिं
च रामं २० लोकाधिनाथं रणरंग
धीरं राजीवनेत्रं रघुवंशनाथं का
रुण्यरूपं करुणाकरं तं श्रीराम
चंद्रं शरणं प्रपद्ये २१ आत्तसज्जध
नुषाविषुस्पृशावक्षयाशुगनिषंग
संगिनौ रक्षणाय मम रामलक्ष्मणौ
वग्रतः पथि सदैव गच्छतां २२ शार

ण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मतां
रक्षःकुलनिहंतारौ त्रायेतां नो रघूत्त
मौ २२ नृसिंहो मे पुरतः पातु पृष्ठतः
पातु माधवः पार्श्वतश्च धनुष्मंतौ त्रा
सरौ रामलक्ष्मणौ २४ सन्नद्धः कवची
खड्गी चापबाणधरो युवा गच्छन्मनो
रथोस्माकं रामः पातु सलक्ष्मणः २५
आरामः कल्पवृक्षाणां विरामः सक
लापदां अभिरामः सर्वलोकानां :
श्रीमान् रामेश्वरप्रभुः २६ रामो दा
सरथिः शूरो लक्ष्मणानुचरो बली
काकुत्स्थः पुरुषः पूर्णः कौशल्येयो
रघूत्तमः २७ वेदान्तवेद्यो यज्ञेशः
पुराणपुरुषोत्तमः जानकीवल्लभः

श्रीमान प्रमेयपराक्रमः २८ एतानिम
मनामानि मङ्कृसततं पठेत् अश्व
मेधायुतं सुर्णं संप्राप्नोति न संशयः
२९ मनोजवं मारुततुल्यवेगं जिते
न्द्रियं बुद्धिमतां वरिष्टं वातात्मजं वा
नरयूथमुख्यं श्रीरामदूतं शरणं प्रप
द्ये ३० अघोघातिदूरेत्वं रोगाल्विष्टं
नुद्दरतः वरीवर्त्ति सदास्माकं हृदिरा
मोधनुर्द्धरः ३१ गोष्पदीकृतवारीशं
मशकीकृतराक्षसं रामायणमहा
मालारत्नं वंदे निलात्मजं ३२ विज्ञा
तनेत्रं परिपूर्णवक्त्रं सुग्रीवमित्रं ज
गतपवित्रं सीताकलत्रं करुणाकरं
तं श्रीरामचंद्रं शरणं प्रपद्ये ३३ रा

माधवरामभद्राय रामचंद्रायवेधसे रघु
नाथायनाथाय सीतायाःपतयेनमः
३४ रामंलक्ष्मणपूर्वजं रघुवरं सीता
पतिंसुंदरं काकुत्स्थंकरुणाकरं गुण
निधिंविप्रप्रियंधार्मिकं राजेंद्रंस।
त्यसंधं दशरथतनयं श्यामलं शांत
मूर्त्तिं वंदेलोकाभिरामं रघुकुलति
लकं राघवंरावणारिं ३५ इतिश्री
विश्वामित्रविरचितंरामरक्षास्तोत्रं
संपूर्णं॥ तुलस्यामृतजन्मासि सदात्वं
केशवप्रियः केशवार्थेविचिन्वामि।
वरदाभवशोभने॥१॥ त्वद्यांसंभवैपत्रैः
पूजयामियथाहरि तथाकुरुपवित्रं
त्वां कलौमलविनाशिनि॥२॥